# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – नवम्बर-दिसम्बर, २०१६

कक्षा – आचार्यप्रथमवर्षम् (SEM-1) **प्रश्नपत्रम् – ३** गुणाः - ७०

विषयः – नव्यन्यायः **कोड – C.C.4.1.2** समयः – ०३ तः ०६ पर्यन्तम्

दिनाङ्कः – ०७/१२/२०१६ सन्दर्भग्रन्थः – हेत्वाभाससामान्यनिरुक्तिः

---

प्रथमान्वितिः (युनिट-१)

प्रश्नः -१ **द्वयोरेकस्य समाधानं सप्रसङ्गं साध्यत ।** ०४

(१) प्रसङ्गसङ्गतिः ।

(२) तत्त्वनिर्णयः।

प्रश्नः -२ **द्वयोरेकस्य निबन्धात्मकमुत्तरं लिखन्तु।** १२

(१) हेत्वाभासनिरूपणे सङ्गतिं प्रदर्श्य दलसार्थक्यं प्रतिपादयत ।

(२) यथाश्रुतमिदं हेतुदोषाणां लक्षणमिति दीधितिपङ्क्तिं व्याख्यात ।

प्रश्नः -३ **निम्नेषु कयोश्चिद् द्वयोः उत्तरं साध्यत ।** ०४

(१) दीधित्युक्तानुमानाकारं गदाधरः कुतो व्यत्यस्तवान्?

(२) प्रथमं हेत्वाभाससामान्यलक्षणं किम्?

(३) अथ हेत्वाभासाः इति मणौ का न्यूनता शङ्किता?

द्वितीयान्वितिः (युनिट-२)

प्रश्नः -४ **द्वयोरेकस्य उत्तरं सन्दर्भसहितं देयम् ।** ०४

(१) हेत्वाभासनिरूपणे प्रयोजनम्।

(२) यथार्थपदसार्थक्यं व्याख्यात ।

प्रश्नः -५ **एकस्य प्रश्नस्य निबन्धात्मकमुत्तरं देयम् ।** १२

(१) द्वितीयलक्षणारम्भे बीजं प्रदर्श्य समन्वयपूर्वकं लिखत।

(२) साक्षात्कारघटितकल्पं समन्वयपूर्वकं व्याख्यात ।

प्रश्नः -६ **चतुर्णाम् अतिलघूत्तराणि लेख्यानि ।** ०४

(१) बाधज्ञानम् कस्य प्रतिबन्धकः?

(२) “यद्विषयकत्वेने”ति कस्य लक्षणम्?

(३) द्वितीयलक्षणे अनतिरिक्तवृत्तित्वं किं रूपम्?

(४) लिङ्गोपाधानमते अनुमितेराकारः कः?

(५) गङ्गेशोपाध्यायेन रचितः ग्रन्थः कः?

(६) अथ हेत्वाभासाः कुतः निरूप्यन्ते?

तृतीयान्वितिः (युनिट-३)

प्रश्नः -७ **द्वयोरेकस्य उत्तरं सन्दर्भसहितं देयम् ।** ०४

(१) स्वरूपसम्बन्धरूपावच्छेदकत्वे दोषः।

(२) अनुमितिपदस्य अनुमितिसामान्यपरत्वे दोषमुत्पाद्य वारयत।

प्रश्नः -८ **एकस्य प्रश्नस्य निबन्धात्मकमुत्तरं लिखत ।** ०८

(१) 'द्वितीयदलप्रवेशात् व्यभिचारविरोधसाधनाप्रसिद्धिस्वरूपासिद्धिषु नाव्याप्तिः' व्याख्यात ।

(२) विशिष्टद्वयाघटितत्वघटितलक्षणं समन्वयपूर्वकं लिखन्तु ।

प्रश्नः -९ **एकैकवाक्येन त्रयाणाम् उत्तरं लेखनीयम् ।** ०३

(१) ह्रदो वह्निमान् इत्यत्र दोषः कुत्र?

(२) अनुमितिपदस्य यथाश्रुतार्थे कुत्र अव्याप्तिः?

(३) स्वव्यापकतत्कत्वं किम् ।

(४) अभिधेयत्वं मेयत्वस्य व्यभिचारीति भ्रमः कस्य विरोधी?

(५) शब्दो नित्यः शब्दत्वादित्यत्र कः दोषः?

चतुर्थान्वितिः (युनिट-४)

प्रश्नः -१० **एकस्योत्तरं सन्दर्भसहितं देयम् ।** ०४

(१) निश्चये अनाहार्याप्रामाण्यज्ञानास्कन्दितत्वप्रयोजनम्।

(२) प्रतिबन्धकत्वं व्याख्यात।

प्रश्नः -११ **एकस्य प्रश्नस्य निबन्धात्मकमुत्तरं लिखत ।** ०८

(१) हेतौ साध्यनिरूपितव्याप्तिवैशिष्ट्यनिवेशनप्रयोजनं स्पष्टयत ।

(२) अभिधेयत्वं मेयत्वस्यव्यभिचारीत्यत्र भ्रमत्वं कथमिति विशदयत।

प्रश्नः -१२ **एकैकवाक्येन त्रयाणाम् उत्तरं लेखनीयम्।** ०३

(१) केचित्तुकारमते तत्त्वमित्यस्यार्थः कः?

(२) वह्न्यभाववत्त्वेनघटावगाहिज्ञानं किं रूपम्?

(३) तत्कार्यकारित्वादित्यत्र कार्यं किम्?

(४) हेत्वाभाससामान्यलक्षणं किम्?

(५) अनैकान्तिकः कः?

***

# समाधानानि

कक्षा – आचार्यप्रथमवर्षम् (SEM-1) **प्रश्नपत्रम् – ३** गुणाः - ७०

विषयः – नव्यन्यायः **कोड – C.C.4.1.2** समयः – ०३ तः ०६ पर्यन्तम्

दिनाङ्कः – ०७/१२/२०१६ सन्दर्भग्रन्थः – हेत्वाभाससामान्यनिरुक्तिः

प्रश्नः- ३

१. पक्षतावच्छेदकावच्छेदेन साध्यानुमितौ सामानाधिकरण्येन बाधनिश्चयस्य प्रतिबन्धकत्वसम्पादनार्थम्।

२. अनुमितिकारणीभूताभावप्रतियोगियथार्थज्ञानविषयत्वम्।

३. प्रसङ्गसङ्गत्यप्रदर्शनेन मूलस्य न्यूनता।

प्रश्नः- ६

१. अनुमितिप्रतिबन्धकः।

२. हेत्वाभाससामान्यलक्षणम्।

३. स्वव्यापकतत्कत्वरूपम्।

४. साध्यव्याप्यहेतुमान्पक्षःसाध्यवान् अथवा हेतुमान् पक्षस्साध्यवान् इति।

५. तत्त्वचिन्तामणिः।

६. तत्त्वनिर्णयविजयप्रयोजकत्वात्।

प्रश्नः -९

१. बाधे।

२. व्यभिचारे।

३. अनतिरिक्तवृत्तित्वम्।

४. व्याप्तिज्ञानविरोधी।

५. सत्प्रतिपक्षः।

प्रश्नः-१२

१. तद्वत्त्वम्।

२. घटवान् ह्लदः।

३. तत्त्वनिर्णयविजयौ।

४. यद्विषयकत्वेनलिङ्गज्ञानस्यानुमितिप्रतिबन्धकत्वं तत्त्वम्।

५. सव्यभिचारः अनैकान्तिकः।